International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# ॥ रामायणे राजनीतिः राजीनीतेः रामायणं वा ॥

**ड. अभिजित् मण्डल**

सहकारी अध्यापकः संस्कृतसंकायस्य पश्चिमबङ्गस्थितस्य कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयस्य

**प्रबन्धसारः**
रामायणं न केवलं महाकाव्यं, न वा केवलं रामचरिताख्यानं, न च रावणवधोत्तरसीतोद्धारपुरःसरं रामराज्यप्रतिष्ठापनमपि तु राजनीतेराकरभूमिभूतमिदम्। वस्तुतस्प्रतिपदमेव राजरीतिः परिलक्ष्यते निरतामेव। क्वचित्प्रतिपदं राजनीतेरवस्थानत्वात् रामयणमेव राजनीतेः स्वरूपं सञ्जातम्। कथं रामायणे राजनीतिः संदृश्यते तद्धि सुष्ठु आलोच्यतेऽस्मिन् प्रबन्धे। यतो हि सम्पूर्णं रामायणं परिव्याप्यैव राजनीतेः बहुदृष्टान्ताः दरीदृश्यन्ते, परन्तु अस्मिन् प्रबन्धे केवलमेकमेव विषयमाश्रित्य राजनीतेः चर्चा क्रियते - तद्धि - "रामस्य वनवासे दशरथस्य मन्थरायाः कैकेय्याः विशेषतः सुमित्रायाः च राजनीतिः"।

**विशिष्टशब्दाः** रामायणम्, राजनीतिः, द्वैधीभावनीतिः, वनवासः, राज्याभिषेकः।

**॥मूलांशः॥**

**शीर्षकपदार्थविचारः**

रामस्य अयनं रामायणम्। अयनं नाम शास्त्रम्। शब्दकल्पद्रुमानुसारं रामस्य चरितान्वितम् अयनं शास्त्रं हि रामायणम्। अतः रामायणे दाशरथेः रामस्य एव चरितचित्रणं स्यात्, न हि तदेव, वस्तुतः रामायणं भवति एकं जीवनदर्शनम्। किञ्च, सर्वेषामेव जीवनं रामायणसम्बन्धितम्। पुनश्च रामायणं भवति अस्माकं भारतीयसंस्कृतेः आधारभूतम्।

ननु का नाम राजनीतिः? राज्ञः नीतिः राजनीतिः। नीतिर्नाम - नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था वास्यामनया वा। नयः एव पर्यायवाची। वस्तुतः अविरोधेन धर्मस्य अर्थस्य उपार्जनं नीतिः। अर्थशास्त्रस्य उपाध्यायनिरपेक्षाटीकायामुच्यते -"प्रत्यक्षपरोक्षानुमानलक्षणप्रमाणत्रयनिर्णीतायां फलसिद्धौ देशकालानुकूल्ये सति यथासाध्यमुपायसाधनविनियोगलक्षणा क्रिया नीतिः"[1] इति। अधुना प्रश्नः समायाति राज्ञः का नीतिः भवति? राज्ञः यानि कर्माणि विद्यन्ते तेषु प्रामुख्यं भजते नीत्या राजपालनम् - राजकर्मणः फलं पृथिव्याः लाभः पालनं चेति। जयमङ्गलाक्रोडपत्रटीकायामुच्यते - "राजवृत्तिः अर्जन-वर्धन-पालन-सत्पात्रपतिपत्तिरूपा भारतीयराजनीतिशास्त्रपरा तदा भवति यदा सा न्याय्या भवति"[2]। राजनीतौ चत्वार उपायाः सन्ति - साम-दान-भेद-दण्डाः।

तत्र साम हि वार्तालापद्वारा विरोधस्य समाधानं, कदाचित् मित्रतायाः बन्धनमपि उच्यते। सामद्वारा समाधानं न भवेच्चेत् उपहारादिप्रदानेन समाधानचेष्टा - तद्धि दानम्। तदभावे तु भेदनीतेः प्रयोगः करणीयः - "Divide and Rule"। यत्तु वयं कथयामो यत् इयं नीतिः आङ्गलीयानां, नैतत्,

---

[1] Kautiliya Arthasastra with Multiple Commentaries Combined Volume - Visvanath Sastri Datar 1991 (SSU):epub:d2b1041d-ec29-4419-8c06-386c5fb8125a, p. 28.
[2] Kautiliya Arthasastra with Multiple Commentaries Combined Volume - Visvanath Sastri Datar 1991 (SSU):epub:d2b1041d-ec29-4419-8c06-386c5fb8125a, p. 29.

एषा तु भारतस्यैव प्राचीना रीतिः। तदभावे तु दण्डनीतेः प्रयोगः करणीयः[3]।
किञ्च, प्रत्येकमेव राजसु सम्यक्तया राज्यपरिपालनाय षड्गुणाः अवश्यमेव स्युः। ते हि गुणाः - सन्धिः सम्पर्कस्थापनं, विग्रहः युद्धः, यानम् उपचितशक्तेः कृतमूलराष्ट्ररक्षस्य शत्रोरास्कन्दनाय यात्रा, आसनं - परस्य स्वस्य च सैन्यानां साम्यं ज्ञात्वा विचक्षणता, द्वैधीभावः एकेन सह मित्रता, अन्येन च सह शत्रुता, संश्रयः समलक्षीभूतराजसु सम्पर्कस्थापनम्। एते एव राजनीतेः अङ्गभूताः
विषयाः[4]।
अधुना वाल्मीकीय-रामायणे उक्तराजनीतेः स्वरूपम् आलोच्यते। यतो हि सम्पूर्णं रामायणं परिव्याप्यैव राजनीतेः बहुदृष्टान्ताः दरीदृश्यन्ते, परन्तु अस्मिन् प्रबन्धे केवलमेकमेव विषयमाश्रित्य राजनीतेः चर्चा क्रियते - तद्धि - "रामस्य वनवासे दशरथस्य मन्थरायाः कैकेय्याः विशेषतः सुमित्रायाः च राजनीतिः"।
आदावेव प्रश्नः जायते - रामस्य वनवासे को हेतुः ? प्रायशः सर्वे कथयन्ति ग्रन्थेषु च उल्लिखिताः सन्ति यत् - मन्थराप्रचोदिता कैकेयी एव रामस्य वनवासे मूलहेतुभूता। न हि, यदि वाल्मीकीयरामायणं गूढाध्ययनं क्रियते चेत् ज्ञायते यत् - रामस्य पिता दशरथ एव मुख्यहेतुः। अस्य हेतुत्वस्य विचारार्थं समासतः रामस्य वनवासगमनवृत्तान्तं स्मर्य्यते।
प्राप्ते वयसि रामस्य राज्याभिषेकविषये चिन्तितो वृद्धो दशरथः छटित्येव भरतं स्वमातुलालयं प्रेरयामास, पुनश्च समग्रविश्वं व्याप्य विशिष्टनृपान् आममन्त्र केवलं केकयराजं तथा जनकं विना। दशरथं विना न कोऽपि जानाति स्म, सत् किम् अभविष्यत्। राज्याभिषेकस्य पूर्वेद्युः आयोजितसभायां सर्वेभ्यो नृपेभ्यः रामस्य राज्याभिषेककथां निवेदयामास। सर्वे एव तुष्टाः, माता कौशल्या तथा कैकेयी अपि। अनन्तरं रामम् आदिदेश - आगामिदिने तस्य राज्याभिषेकः अतः अद्य सावधानेन स्थातव्यम्। ततश्च, मन्थराद्वारा परिवर्तितमनस्का कैकेयी पूर्वप्रदत्तकथानुसारं स्वपुत्रस्य भरतस्य राज्याभिषेकं तथा रामस्य वनवासं कामयामास। रामोऽपि पितृसत्यरक्षणाय वनं गन्तुमियेष।
एतत्तु सत्यं यत् यदि रामस्य वनवासः न अभविष्यत्, शूर्पणखावृत्तान्तं न स्यात्, तर्हि सीतायाः हरणं न अभविष्यत्, हरणाभावे रावणवधोऽपि न अभविष्यत्। वस्तुतः रावणवधाय एव
रामस्य आविर्भावः[5]। अत्रैव रामस्य वनवासगमनतात्पर्यम्। परन्तु क्वात्र राजनीतिः ?

**अत्र राजनीतिदृष्ट्या केचन प्रश्नाः प्रथन्ते नितरामेव।**
**प्रथमतः** - यौवराज्याभिषेकरूपशुभानुष्ठानस्य प्राक् कथं प्रियमहिष्याः कैकेय्याः पुत्रं भरतं मातुलालयं प्रेषयामास? किं भरतोऽपि अस्मिन् शुभानुष्ठाने भागग्रहणं करिष्यति इति इच्छा दशरथस्य नासीत् ?
**द्वितीयतः** - यौवराज्याभिषेकाय प्रायः सर्वे एव राजानः देशान्तरतः समागताः, किञ्च, म्लेच्छराजानः, पर्वतीयराजानः, वनस्थराजानः सर्वे एव समागताः - कथं तत्र केकयराज्ञे आमन्त्रणपत्रं न प्रेषयामास? कथं न जनकाय आमन्त्रणं प्रेषयामास?
तृतीयतः - एतादृश्याः त्वरायाः कारणं किम् ? एकस्मिन् दिवसपूर्वे कैकयीभ्राता युधाजित् अयोध्यायामेवासीत्। यौवराज्याभिषेकरूपशुभानुष्ठाने तेषामपि भागग्रहणम् आनन्ददायकमेव अभविष्यत्। तन्न चिन्तितं दशरथेन।

एतेषामुत्तरं तु वाल्मीकीयरामायणस्य सम्यगध्ययनेनैव ज्ञायते - वस्तुतः राजा दशरथः कामी पुरुषः

[3] "यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः। दण्डेनैव प्रसह्यैताञ्शनकैर्वशमानयेत्॥" (मनुसंहिता, ७-१०८) एतदपि दृश्यते यत् - "सामादीनामुपायानां चतुर्णामपि पण्डिताः। सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥" (मनुसंहिता, ७-१०९)
[4] "सन्धिञ्च विग्रहञ्चैव यानमासनमेव च। द्वैधीभावं संश्रयञ्च षड्गुणाश्चिन्तयेत्सदा॥" (मनुसंहिता, ७-१६०)
[5] "स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः। अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः॥" - (रामायणम्, अयोध्याकाण्डम्, १ सर्गः ७ )

आसीत् - स वृद्धः सन्नपि तरुणीं कैकेयीं कथञ्चित् छलेनैव पाणिग्रहणं चकार[6]।
दशरथस्य मनसि भीतिरासीत् यत् - कैकेय्या सह परिणयकाले केकयराजानं वचनं ददौ यत्
कैकेयीपुत्रमेव राज्यं दास्यति इति[7]।
एतेन राज्ञः कामिजनस्यापि परिचयः प्राप्यते। एतत्सर्वं विचिन्त्य राजा दशरथः राजनीतेः आश्रयं नीतवान्।
आदौ एव द्वैधीभावनीतिः समाश्रिता - रामस्य यौवराज्याभिषेकाय ये कण्टकसमानाः तान् पृथकीचकार। त्वरितेमव भरतं मातुलालयं प्रेषयामास, केकयराज्ञे च आमनपत्रं न प्रेषयामास। ननु कथं स्वपुत्रः भरतः एव कण्टकसमानः ? रामं प्रति दशरथवचनमेव प्रमाणम् -

"विप्रोषितश्च भरतो यावदेव पुरादितः।
तावदेवाभिषेकस्ते प्राप्तकालो मतो मम॥"
(रामायणम्, अयोध्याकाण्डम्, ४ सर्गः, २५)

रामायणशिरोमणिटीकायां शिवसहायो लिखति - "इतः अस्मात् पुरात् यावत् कालं भरतो विप्रोषितो मातुलकुले स्थितस्तावदेव ते अभिषेकः प्राप्तकालो मम मतः संमतः एतेन भरतागमने सति अभिषेको न भविष्यतीति सूचितम् तेन केकयीविवाहसमये राज्यशुल्कं केकयराजाग्रे प्रतिश्रुतमिति वृत्तं रामाय कथयामासेति वक्तव्यम्" इति।
किञ्च, निकटात्मीयं केकयराजा न आमन्त्रितः, तेन प्रजामनसि शङ्का अभविष्यत् तस्मात् राजानं सीताजनकजनकाय अपि आमन्त्रणपत्रं न प्रेषयामास - तेन प्रजामनसि एवं वार्ता भवेत् यत् आशुवशतः दशरथस्य एवं भ्रमः अभवत् - अत्र तु सामनीतेः तथा संश्रयनीतेः च व्यवहारं चकार
दशरशः[8]।

रामस्य वनवासप्रसङ्गे कैकेय्याः अवस्थानम्

यदा सा कैकेयी मन्थरामुखात् रामस्य यौवराज्याभिषेकवार्तां श्रुतवती तदा किं रागान्विता बभूव सा? न हि, सा तु सन्तुष्टा एव आसीत्। वाल्मीकिः लिलेख -

"अतीव सा तु संतुष्टा कैकेयी विस्मयान्विता।
दिव्यमाभरणं तस्यै कुब्जायै प्रददौ शुमम्॥३२
रामे वा भरते वाहं विशेषं नोपलक्षये।
तस्मात्तुष्टास्मि यद्राजा रामं राज्येऽभिषेक्ष्यति॥३५"
(रामायणम्, अयोध्याकाण्डम्, ७ सर्गः)

रामस्यैव गुणान् देवी कैकेयी प्रशशंस। सा मन्थरां प्रति उवाच -

"धर्मज्ञो गुणवान्दान्तः कृतज्ञः सत्यवाञ्छुचिः।
रामो राजसुतो ज्येष्ठो यौवराज्यमतोऽर्हसि॥
भ्रातृन्भृत्याश्च दीर्घायुः पितृवत्पालयिष्यति।
संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनम्॥"

---

[6] "स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम्॥ २३॥ कामी कमलपत्राक्षीमुवाच वनितामिदम्॥" २७॥ (रामायणम्, अयोध्याकाण्डम्, १० सर्गः)
[7] "पुरा भ्रातः पिता नः स मातरं ते समुद्वहन्। मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम्॥" (रामायणम्, अयोध्याकाण्डम्, १०७ सर्गः, ३)
[8] "न तु केकयराजानं जनकं वा नराधिपः। त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियम्॥"- (रामायणम्, अयोध्याकाण्डम्, १ सर्गः, ४८)

किञ्च, कथं न भरतस्य यौवराज्याभिषेकः अभवत्, कथं रामस्य - ईदृशी ईर्षा न तस्या चेतसि आगता। स्वपुत्रस्य भरतस्य राज्यलाभविषये सा उवाच -

"भरतश्चापि रामस्य ध्रुवं वर्षशतात्परम्।
पितृपैतामहं राज्यमवाप्स्यति नरर्षभः॥"

(रामायणम्, अयोध्याकाण्डम्, ८ सर्गः, १४-१६)

वस्तुतः कैकेयी-सकाशे रामः अतीव प्रियः आसीत्। कदाचित् स्वपुत्रभरतापेक्षयापि अधिकस्नेहास्पदं आसीत् रामः। अतः सा अकथयत् -

"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः।
कौसल्यातोऽतिरिक्तं च मम शुश्रूषते बहु॥"

(रामायणम्, अयोध्याकाण्डम्, ८ सर्गः, १८७)

वाल्मीकिरामायणानुसारं कैकेयी अत्यन्तसन्तुष्टा एव आसीत्। यद्यपि कैकेयी राजनैतिकमनस्का नासीत् तथापि अत्र तस्याः वचनानुसारं संश्रयनीतेः परिचयः प्राप्यते।

रामस्य वनवासप्रसङ्गे मन्थरायाः अवस्थानम्

वाल्मीकीयरामायणानुसारं मन्थरा राजनैतिकमनस्का तीक्ष्णधीशालिनी नारी आसीत्। केकयराजा जानाति स्म यत् कैकेयी अत्यन्तसरला सुशीला च नारी, तदर्थं तस्याः परिपालनायैव मन्थरा नियुक्ता। वस्तुतः मन्थरा यदेव कृतवती तत्तस्याः स्वधर्मः इति मन्यमानया त्वया कैकेय्यै बुद्धिः प्रादायि।

अत्र अवश्यं चिन्त्यं यत् राजनीतिः तथा कूटनीतिः द्वे एव भिन्ने। यद्यपि राजनीतौ कूटनीतिः स्यादेव तथा सा कूटनीतिः न परेषाम् अहिताय भवति। यदि कूटनीतौ स्वार्थः निहितः स्यात् सा नीतिः न राजनीतिः न ग्राह्या भवति, सा तु जघन्या। यथा चाणक्येन कथञ्चित् कूटनीतिद्वारा धनानन्दं सिंहासनच्युतं कृत्वा मगधस्य तथा अखण्डभारतस्य समुन्नतिः विधायि - इयं कूटनीतिः तु प्रशस्यतरा एव। परन्तु मन्थरायाः कूटनीतिः जघन्या आसीत्। मन्थरा यद् अश्रावयत् -

"भविता भरतो राजा राघवस्य च य सुतः।
राजवंशात्तु भरतः कैकेयि परिहास्यते॥२२॥
न हि राज्ञः सुताः सर्वे राज्ये तिष्ठन्ति भामिनी।
स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत्॥२३॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकम्।
देशान्तरं नाययिता लोकान्तरमथापि वा॥२७"

(रामायणम्, अयोध्याकाण्डम्, ८ सर्गः)

मन्थरायाः इयं कूटनीतिः सम्पूर्णतया राजनैतिकदृष्ट्या द्वैधीभावमेव सूचयति।

पुनश्च एतदपि सत्यं यत् राजधर्मदृष्ट्या सा मन्थरा स्वधर्मं पालयति स्म। यतो हि कैकेय्याः सुरक्षा एव तस्याः प्रधानो धर्मः। किञ्च, मन्थरायाः इयं राजनीतेः दूरदर्शिता तु प्रशस्यतरा- यद्धि - रामस्य यौवराज्याभिषेकनिवारणाय तथा भरतस्य अभिषेकाय पन्थाद्वयमासीत् -

प्रथमतः - कैकेय्याः विवाहसमये दशरथेन कैकेयीपुत्राय राज्यशुल्पप्रादनरूपप्रदत्तवचनम्।

द्वितीयतः - देवासुरसंहारे प्रदत्तवरद्वयकथा। -

"तुष्टेन तेन दत्तौ ते द्वौ वरौ शुभदर्शने"

(अयोध्याकाण्डम्. ९ सर्गः, १७)

ननु को मार्गः आश्रयणीयः येन न कोऽपि विपक्षवाचं वदेत्। आद्याश्रिते नैके वदेयुः रामः एव श्रेष्ठः ज्येष्ठश्च अतो राज्यलाभे तस्याधिकारत्वं सर्वातिशायि। अपि च यः कामी वचनं प्रदाय विवाहं चकार, अनायासेनैव वचनं विस्मरेत्। किञ्च, तत्र मिथ्यावचनमपि स्यात्। यतो हि शास्त्रे प्रसिद्धं विद्यते -

"न नर्मयुक्तमनृतं हिनस्ति /न स्त्रीषु राजन् न विवाहकाले।

न गुर्वर्थं चात्मनो जीविकार्थे /पञ्चानृतान्याहुरपातकानि॥"

(महाभारतम्, शान्तिपर्व-३०)

किञ्च, मनुस्मृतौ प्राप्यते -

"कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने।

ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्॥"

(मनुसंहिता- ८/११२)

तस्मात् मन्थरया द्वितीयो मार्गः चितः। अतो यदा मन्थरादुर्बोधेन विकृतहृदया कैकेयी रामनिर्वासनपूर्वकं भरताभिषेचनं प्रतिज्ञाय मन्थरां प्रत्येव तत्सिद्ध्युपायं पप्रच्छ, तदा मन्थरा दैवासुरसंग्राममुपन्यस्य तत्समये दशरथात्संपादितवरयोः रामप्रवासनभरताभिषेचनसंसिद्धिं प्रदर्श्य तद्वरणे कैकेयीं प्रेरयामास। ततश्च कैकेयी मन्थरामभिप्रशस्याभरणान्युन्मुच्य क्रोधागारक्षितिमधिशय्ये। अत्र तु राजनीतौ याः नीतयः सन्ति सर्वासामेव प्रयोगं चकार मन्थरा। अहो राजनीतेः स्वरूपम्।

रामस्य वनवासप्रसङ्गे विमातासुमित्रायाः अवस्थानम्

राज्ञः दशरथस्य मध्यमा महिषी सुमित्रा अत्यन्तराजनीतिनिष्णाता। सा सदैव सामनीतिं समाश्रित्य प्रतिपदक्षेपं तनोति स्म। साजानत् राज्याधिकारे तस्याः पुत्रौ लक्ष्मण-शत्रुघ्नौ अनधिकारिणौ। राम-भरतौ एव राज्याधिकारिणौ। अतः सा बाल्यादेव रामेण सह लक्ष्मणं तथा भरतेन सह शत्रुघ्नं युयाव। तेन रामे राजनि सति लक्ष्मणः प्रियपुरुषः, भरते च शत्रुघ्नः अभविष्यत् निश्चप्रचम्। तेन सदैव कोऽपि एकः राजपुरुषः। सहवासत्वात् दैवीवशाद्वा राम-लक्ष्मणौ भरत-शत्रुघ्नौ विश्ववन्दितौ जग्मुतुः।

परिशेषे वक्तुकामोऽहं रामस्य वनवासराजनीतौ तु न दशरथस्य विजयः मनोवाञ्छायाः अपूर्णत्वात्, न च मन्थराप्रचोदितायाः कैकेय्याः, या तु प्रथमे विजयं प्राप्यापि अन्तिमे प्राप्तपराजयग्लानिः अद्यावधि कलङ्कायितं करोति ताम्, कौसल्या पराजयं प्राप्यापि विजयिणी सा रामस्य प्रसिद्धौ। सर्वाधिकतया विजयिणी सुमित्रा एव। सर्वत्रैव तस्या विजयः। विना च विजयं क्व राजनीतेर्माहात्म्यम्? वस्तुतः रामायणे पदे पदे एव राजनीतेः चर्चाम् अवलोक्य वक्तुं युज्यते यत् राजनीतेः आधारभूतं भवति रामायणम्।

**सहायकग्रन्थाः**


1. वाल्मीकिः. रामायणम् (तिलक-शिरोमणि-भूषणेति टीकात्रयेणोपस्कृतम्). सम्पा. श्रीनिवासशास्त्री. दिल्ली: परिमल पावलिकेशन. २००७.
2. वाल्मीकिः. रामायणम् (The Rāmāyaṇa of Vālmīki - An Epic of Ancient India). अनु. शेलडल् पोलक. दिल्ली: मोतीलाल वनारसीदास. २००७.
3. कौटिल्यः. कौटिलीयम् अर्थशास्त्रम्. सम्पा. मानवेन्दु वन्द्योपाध्यायः. कलिकाता: संस्कृत-पुस्तक-भाण्डारः. २०१४.
4. वेदव्यासः. महाभारतम्. अनु. एम्. एन्. दत्तः. दिल्ली: परिमल पावलिकेशन. २०१३.
5. मनुसंहिता. सम्पा. मानवेन्दु वन्द्योपाध्यायः. कलिकाता: संस्कृत-पुस्तक-भाण्डारः. २०१६.
6. कीथ, ए. वि. संस्कृत साहित्य का इतिहास. दिल्ली: मोतीलाल वनारसीदास. २०१६.